## SAN202
## (पातञ्जलयोगदर्शनम्)
### अथ योगानुशासनम्

अस्मिन् सूत्रे अथ इति अयं शब्दः अधिकारार्थो वर्तते। योगानुशासनं शास्त्रमधिकृतं ज्ञातव्यम् योगः समाधिः अर्थात् बुद्धेरवस्थानं सम्यगेव समाधिरिति अस्माभि वक्तुं शक्यते। स च समाधिः सार्वभौमश्चित्तस्य धर्मः अर्थात् सम्पूर्णेऽपि जगति चित्तस्य धर्मोऽथवा कार्यं समाधिरेव। क्षिप्तम्, मूढम्, विक्षिप्तम् एकाग्रम्, निरुद्धमिति चित्तस्य भूमयः सन्ति। एतानि सर्वाण्यपि चित्तस्य भूमिरूपेण वयम् जानीमः। तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते। अर्थात् एतासु भूमिषु विक्षिप्तभूमियुक्तचित्तस्य समाधिः विक्षेपकारणात् गौणत्वात् योगस्य वर्गे न स्वीक्रियते। यस्तु समाधिः एकाग्रे चेतसि सम्भवति तथा आलम्बनरूपेण बुद्धौ स्थितपदार्थान् प्रद्योतयति, अविद्यादीन् सर्वानपि क्लेशान् क्षिणोति, कर्मबन्धनानि शिथिलं करोति अर्थात् कार्यार्थम् अक्षमं करोति असम्प्रज्ञातसमाधिं च प्रत्यक्षं करोति सः समाधिः सम्प्रज्ञातसमाधिरिति प्रोच्यते स च समाधि वितर्कानुगतोऽथवा वितर्केण युक्तः. विचारेण युक्तः, आनन्देन युक्तः, अस्मितया युक्तश्च भवति। अस्य स्पष्टरूपेण अग्रे विवेचनं कृतं वर्तते। सर्वासु वृत्तिषु निरोधेषु सत्सु तो सम्प्रज्ञातसमाधि भवत्येव।

### योगश्चित्तवृत्तिनिरोधः

सर्वशब्दाग्रहणात्सम्प्रज्ञातसमाधिरपि योग इत्याख्यायते अर्थात् कथ्यते। चित्तं प्रकाशशीलम् अर्थात् ज्ञानकारकं चेष्टाशीलम् अर्थात् चेष्टाकारकं स्थैर्यशीलम् अथवा चित्तं त्रिगुणयुक्तं वर्तते। प्रकाशशीलं चित्तसत्त्वं रजोगुण-तमोगुणाभ्यां संसर्गत्वात् शब्दादिविषयाणाम् ऐश्वर्याणाम् इच्छुको भवति। तदेव चित्तं तमोगुणेन युक्तं भवति चेत् अधर्म-अज्ञान-अनैश्वर्य-अवैराग्येषु मग्नं जायते। तदेव चित्तं तमोगुणजन्यमोहस्य आवरणात् रहित्वात् सर्वतः प्रकाशमानम् अनुविद्धं(अस्पृष्टं) रजोमात्रया तदा धर्म-ज्ञान-वैराग-ऐश्वर्यान् प्रति आकर्षति। तदेव चित्तसत्त्वं यदा तस्य रजोगुणरूपकात् क्लेशमलसंसर्गात् अयुक्तं भवति तदा स्वकीयं शुद्धं सात्विकरूपेण प्रतिष्ठते। बुद्धेस्तथा पुरुषस्य विभेदोऽथवा विवेकज्ञानं रूपस्य जायते तच्च चित्तसत्त्वं धर्ममेघसमाधेस्थितिनिरूपकं भवति। योगिनः तत् परप्रसंख्यानमिति शब्देन अवगच्छन्ति। पुरुषतत्त्वम् अपरिणामी, निष्क्रियः, द्रष्टा, शुद्धः अनन्तश्च भवति। इयं विवेकख्यातिः अस्मात् सर्वथा भिन्ना सत्त्वगुणात्मिका च भवति। अतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि, अस्यां पूर्णनिरोधभूम्यां स्थितं चित्तं संस्कारमात्रावशिष्टं भवति। अयं निर्बीचसमाधिरित्युच्यते। अस्यां स्थितौ चित्ते न कस्यापि वस्तुज्ञानं जायते, अतोऽयम् असम्प्रज्ञातसमाधिरित्युच्यते। अतश्चित्तवृत्तिनिरोधलक्षणयुक्तोऽयं योगः सम्प्रज्ञातासम्प्रज्ञातयोगः इति कथ्यते।